अज्ञानसाक्षिन् (ajñāna-sākṣin) *m.* witness of nescience रघूत्तमे … न विद्यते तमः । अज्ञानसाक्षिण्यरविन्दलोचने मायाश्रयत्वान्न हि मोहकारणम् AdhyāRā. i. 1. 24.

अज्ञानसाक्षिप्रकाश (ajñānasākṣi-prakāśa) *m.* illumination in the form of the witness of nescience प्रतियोगिविषयप्रकाशतामात्रेण तद्विरोधित्वे त्वज्ञानसाक्षिप्रकाशस्यापि प्रतियोगिप्रकाशत्वावश्यंभावेन विरोधाविशेषात् S'atDū. 170. 9.

अज्ञानसागर (ajñāna-sāgara) *m.* ocean of ignorance अनादिनिधने देवे हरिशंकरसंज्ञिते । अज्ञानसागरे मग्ना भेदं कुर्वन्ति पापिनः BṛNāraP. 6. 42; यदि वा मुच्यते वापि तस्मादज्ञानसागरात् BrahmP. 244. 49; 244. 50; अज्ञानसागरं तीर्त्वा ब्रह्मतत्त्वमभीप्सताम् । नीतिनौकर्णधारेण मयापूरि मनोरथः Bhām. 766. 7 (*on* iv. 4. 22)

अज्ञानसाधक (ajñāna-sādhaka) *adj.* establishing or proving nescience किं प्रकाशस्वभावस्य अज्ञानाश्रयत्वविरोधोऽनुभूयते उतानुमीयते । नाद्यः अज्ञानसाधकसाक्षिचैतन्ये 'अहमज्ञः' इत्यज्ञानाश्रयतया एवानुभवात् VivaPraSaṁ. 56. 11.

अज्ञानसाधकत्व (ajñānasādhaka-tva) *n.* the state of establishing or proving nescience सत्यस्य साक्षिणोऽज्ञानसाधकत्वं पराभ्युपगतमुपन्यस्तम् NyāySu.(Ja.) 30A. 12 (*on* i. 1. 1); Nyāyāmṛ. 634A. 8; तच्चाज्ञानसाधकत्वात् स्वरूपतो नाज्ञाननिवर्तकम् AdvaiSi. 469. 2; अज्ञानसाधकत्वं हि अज्ञाननिश्चयत्वम् LaCandr. 441. 39.

अज्ञानसाधन (ajñāna-sādhana) *n.* **i** means of establishing what is not knowledge सुखमपि तर्हि…किमसुखसाधनेन तज्जनितम्, ज्ञानमपि किमज्ञानसाधनेन जनितम् NyāyMañ. i. 72. 23; **ii** establishment of non-cognition तत्र युगपदवभासो नास्तीति तद्दृष्टान्तेन सर्वत्राप्येवमनुमीयत इति चेन्न । असन्निहितवत् सन्निहितस्यापि अज्ञानसाधने प्रतीतिविरोधात् NyāySu.(Ja.) 408A. 10 (*on* ii. 2. 8)

अज्ञानसापेक्षता (ajñānasāpekṣa-tā) *f.* dependence on nescience एतेन ब्रह्मान्यद् ब्रह्मावरणाज्ञानावृतमिति तृतीयोऽपि (पक्षः) निरस्तः । तस्य मिथ्यात्वेनाज्ञानसापेक्षतयान्योन्याश्रयत्वात् NyāySu.(Ja.) 61A. 2 (*on* i. 1. 1)

अज्ञानसापेक्षा (ajñāna-sāpekṣā) *adj.* (*f.*) dependent on or requiring nescience जीवब्रह्मणोर्भेदो यया भ्रान्त्या सिद्धः सा तावदज्ञानसापेक्षा NyāySu. (Ja.) 206B. 11 (*on* i. 4. 6)

अज्ञानसामान्य (ajñāna-sāmānya) *n.* nescience in general अपरोक्षत्वमज्ञानसामान्यविरोधि चैतन्यम् GuruCandr. i. 141. 13; i. 139. 13; ii. 130. 6; वेदान्तजन्यवृत्तेस्त्वज्ञानसामान्यविरोधित्वम् LaCandr. 887. 41; अज्ञानसामान्यविरोध्युपहितात्मनः परमपुरुषार्थत्वादस्थिरत्वमकिंचित्करम् LaCandr. 888. 19; 288. 8; 564. 22.

अज्ञानसाम्य (ajñāna-sāmya) *n.* similarity in lack of comprehension ननु यथाज्ञानसाम्येऽपि विषयभेदमाश्रित्य निग्रहस्थाननानात्वमित्थमभिधीयते तथैवाज्ञानप्रकारवैचित्र्याद् भेदान्तराण्यपि वक्तव्यानीति उक्तमत्र सारसंग्रहविवक्षया द्वे एव निग्रहस्थाने विप्रतिपत्तिरप्रतिपत्तिश्चेति NyāyMañ. ii. 203. 32.

अज्ञानसिद्ध (ajñāna-siddha) *adj.* w. r. for **आजानसिद्ध,** S'aṅkaVi. (Ā.) 253. 2.

अज्ञानसिद्धि (ajñāna-siddhi) *f.* establishment of nescience सम्यग्ज्ञानाद् ब्रह्मणोऽज्ञानसिद्धौ तस्यापि स्यात् सत्यता तद्वदेव SaṁkṣeS'ā. 2. 140 (ii. 89. 19); अतो न प्रमाणं विना अज्ञानसिद्धिः IṣṭaSi. 194. 20; मिथ्याविशेषोऽप्यज्ञानसिद्धिमेव ह्यपेक्षते AnuVyā. 2B. 3 (*on* 1. 1); NyāySu.(Ja.) 30A. 7 (*on* i. 1. 1); अज्ञानसिद्धौ मिथ्योपाधिसिद्धिः ViṣṇuTaNi. 15B. 11; अज्ञानसिद्धिपूर्वं दृश्यमात्रस्य साक्षात् ज्ञाननाश्यत्वसिद्धावपि न स(? सा)धनवैकल्यम् LaCandr. 567. 27; GuruCandr. ii. 424. 21.

अज्ञानसिद्धिकृत् (ajñānasiddhi-kṛt) *adj.* establishing ignorance or nescience बोधमात्रातिरेकेण नान्योऽर्थोऽज्ञानसिद्धिकृत् BṛĀraUBhVā. iv. 4. 898.

अज्ञानसिन्धु (ajñāna-sindhu) *m.* ocean of ignorance or nescience तदनु तदपरोऽज्ञानसिन्धुं प्रविष्टः S'atS'lo. 27.

अज्ञानसुघनाकारा (ajñāna-sughanākārā) *adj.* (*f.*) having solid or very dense form of ignorance अज्ञानसुघनाकारा घनाहंकारशालिनी । पुनर्जन्मकरी प्रोक्ता मलिना वासना बुधैः YogVā. i. 3. 12 (तेन (अज्ञानेन) सुष्ठु घनीभूत आकारो यस्याः सेयमज्ञानसुघनाकारा JīvanVi. 50. 10)

अज्ञानसुहृद् (ajñāna-suhṛd) *m.* friend in ignorance or foolishness छन्दानुवर्तिनः पापाद् दुर्नयेष्वनुवादिनः । मन्त्रिणः शत्रवो राज्ञामज्ञानसुहृदः परम् RāmāMañ. 350. 12.

अज्ञानसूत्र (ajñāna-sūtra) *n.* string or bond of ignorance अज्ञानसूत्रेण तथावबद्धो गतोऽपि दूरं पुनरेति लोकः Saund. 11. 59.

अज्ञानस्थ (ajñāna-stha) *adj.* abiding or present in ignorance or nescience ज्ञानक्रियासंस्काराणां च त्वन्मते अज्ञानस्थत्वेऽपि नित्यातीन्द्रियाणां तेषामात्मनि कदाप्यप्रतीतेः Nyāyāmṛ. 345A. 8.

अज्ञानस्थगिता (ajñāna-sthagitā) *adj.* (*f.*) veiled or obscured by ignorance अज्ञानस्थगितां सतीमपि तथा त्वद्रूपतामात्मनः प्राप्यैवागमतः प्रहृष्यति सुधीर्ज्ञानप्रसूनाम्बिके YātrāPra. 6. 171.

अज्ञानस्थान (ajñāna-sthāna) *n.* **i.** topic of ignorance or nescience न शक्यते दर्शयितुमिति मन्यमानो यदि शब्दं प्रयुङ्क्ते पूर्वान्तेऽज्ञानमपरान्तेऽज्ञानं बुद्धेऽज्ञानं धर्मेऽज्ञानं संघेऽज्ञानं इत्येवमादीनां सर्वेषामज्ञानस्थानानामुक्तत्वात् Sphuṭā. iii. 48. 5 (*on* 3. 38); **ii** place of nescience अज्ञानस्थाने अज्ञानीयावरणशक्तिर्वाच्या LaCandr. 155. 41.

अज्ञानस्पर्शदोष (ajñānasparśa-doṣa) *m.* fault of touching (somebody) unintentionally (मुनिपत्न्य ऊचुः) अजानन्त्यः परस्पृष्टा न च नस्त्यक्तुमर्हसि । …अज्ञानस्पर्शदोषश्च न स्यान्नो विधिबोधितः BrahmVaiP. iv. 18. 92.

अज्ञानस्वभाव (ajñāna-svabhāva) *adj.* of nature of ignorance or nescience संभवदप्यज्ञानस्वभावे (आत्मनि) अज्ञानं कमतिशयं जनयेत् NaiṣkaSi. 104. 4.

अज्ञानस्वरूप (ajñāna-svarūpa) *adj.* [*f.* -ā] **i** of the nature of false knowledge सत्कायदृष्ट्यादयोऽपि क्लेशा अज्ञानस्वरूपा विपरीतग्रहणत इति Sphuṭā. iii. 57. 23 (*on* 3. 29); **ii** of the form or nature of ignorance or nescience न चात्मनोऽज्ञानस्वरूपता NaiṣkaSi. 105. 6; (मुक्तजीवः) निरञ्जनं ज्योतिः प्राप्य स्वयमपि ज्योतिःस्वरूपो भवति अज्ञानस्वरूपाया रात्रेस्तत्राभावात् S'aṅkaVi.(Ā.) 257. 14; *n.* form or nature of ignorance or nescience यच्चतिरोहितस्वरूपमेव ब्रह्माज्ञानमनुभवतीति तिरोधानकल्पना स्यात् अज्ञानस्वरूपकल्पना च BrahmSūBh.(Rā.) 89. 18 (*on* i. 1. 1); अहमज्ञ इत्यज्ञानस्वरूपकीर्तनम् S'rutaPra. iB. 8. 15 (*on* i. 1. 1); Nyāyāmṛ. 335A. 6; उपहिते विषये अज्ञानस्वरूपसिद्धिः GuruCandr. i. 134. 9; ii. 400. 22; तदा तत्प्रमाणावेद्यत्वेन व्यावहारिकं न स्यात् अज्ञानस्वरूपवत् LaCandr. 550. 24.

अज्ञानस्वीकार (ajñāna-svīkāra) *m.* acceptance or assumption of ignorance or nescience श्रीरामरूपलीलाविग्रहे श्रीविष्णोः सर्वज्ञस्य निर्मातृचित्तेनाज्ञानस्वीकारश्च नोपपद्यत इति भावः YogSā. 63. 9 (3); न चाज्ञानतद्विरोधित्वयोः कल्पने गौरवमिति वाच्यम्, ज्ञानप्रागभावस्थले अज्ञानस्वीकारात् GuruCandr. i. 148. 13.

अज्ञानहन् (ajñāna-han) *m.* name of Viṣṇu (destroyer of ignorance) अज्ञानहा…नाम्नां सहस्रं नामेदं विष्णोरतुलतेजसः SkandP. v(1). 63. 121.

अज्ञानहन्तृ (ajñāna-hantṛ) *adj.* destroyer of ignorance सर्वलोकाश्च राजा च ततस्तं (विनायकम्) तुष्टुवुर्मुदा ।… नमोऽज्ञानहन्त्रे GaṇeP. ii. 15. 46; *m.* name of Viṣṇu अज्ञानहन्ता…इति…कथितम्…नाम…विष्णोर्बालकत्वमुपेयुषः PañcaRā.(Nā.) iv. 8. 148.

अज्ञानहान (ajñāna-hāna) *n.* removal of nescience विद्यैवाज्ञानहानाय न कर्माप्रतिकूलतः UpadeSā. 123. 6; 135. 25; दशमास्मिवदाप्तिः स्यादब्रह्मणोऽज्ञानहानतः TaiUBhVā. 47. 2 (2); 61. 16 (2); NaiṣkaSi. 16. 5; 28. 9; अज्ञानहानतः । सिद्धे पुमर्थे विलयकल्पना निष्प्रयोजना BṛĀraUBhVā.(Sambandha.) 397; स इदं सर्वमात्मैव भवत्यज्ञानहानतः BṛĀraUBhVā. i. 4. 1460; ii. 1. 238; iii. 3. 37; iv. 4. 775.

अज्ञानहानि (ajñāna-hāni) *f.* destruction of nescience स्वसिद्धेः कारणं नान्यज्ज्ञानमज्ञानहानये TaiUBhāVā. 189. 17 (2); BṛĀraUBhVā. i. 3. 229; iii. 3. 91; iv. 3. 1282; नाज्ञानहानिः … भवेत् AdhyāRā. vii. 5. 10; VedāntKa. 511. 15 (*on* iv. 1. 2); अज्ञानहानिवत् … भेदस्य सापेक्षत्वं हि युज्यते Nyāyāmṛ. 551A. 8; 631A. 6; 633A. 10; 640A. 10; AdvaiSi. 792. 1; 884. 3; 885. 17.

अज्ञानहारिन् (ajñānahār-in) *adj.* [*f.* -ṇī] removing ignorance पुरुषो मे पुराणः श्रीमानज्ञानहारी मनसि निवसताम् VṛHāriSm. 6. 400; SkandP. iii(1). 46. 41; प्रीता भूत्वा भगवती भवत्यज्ञानहारिणी SaurP. 29. 53; नमः सद्गुरवे तुभ्यम्…अज्ञानहारिणे MahNirvāT. 5. 32.

अज्ञानहृदयग्रन्थि (ajñāna-hṛdayagranthi) *m.* knot of the heart in the form of nescience अज्ञानहृदयग्रन्थेः निःशेषविलयस्तदा … यदाद्वैतात्मदर्शनम् ViveCū. 355; 425.

अज्ञानहेतु (ajñāna-hetu) *adj.* cause of which is nescience, caused by nescience न ततोऽमृतताशास्ति कर्मणोऽज्ञानहेतुतः UpadeSā. 190. 15; BṛĀraUBhVā. i. 3. 90; SaṁkṣeS'ā. 1. 30 (i. 39. 20); 2. 172 (ii. 105. 17); *m.* **A** cause of ignorance अनिवेदिते च अज्ञानहेतौ ह प्रजापतिरुवाच ChāndoUBh. 512. 15 (*on* viii. 8. 1); UpādhiKha. 1B. 3; **B** cause namely nescience or ignorance आत्मस्वभावतो नास्तित्वथाप्यज्ञानहेतुतः BṛĀraUBhVā.(Sambandha.) 1101; i. 4. 390; ii. 1. 218; iv. 4. 376; AdhyāRā. v. 4. 17; द्वैतस्य सत्यता स्वत